# Shri Mahaganapatinama Stotram Namavali

# श्रीमहागणपतिनामस्तोत्रं नामावलिश्च

## Document Information

Text title : Shri Mahaganapatinama Stotram Namavali

File name : mahAgaNapatinAmastotraMnAmAvalishcha.itx

Category : ganesha, nAmAvalI, stotra

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# श्रीमहागणपतिनामस्तोत्रं नामावलिश्च

अथ स्तोत्रम् ।
पञ्चवक्रो दशभुजो ललाटेन्दुः शशिप्रभः ।
मुण्डमालः सर्पभूषो मुकुटाङ्गदभूषणः ॥ १॥

अग्न्यर्कशशिनो भाभिस्तिरस्कुर्वन् दशायुधः ।
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ॥ २॥

विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ।
आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ॥ ३॥

सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ।
मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥ ४॥

प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ।
पराभिचारशमनो दुःखभञ्जनकारकः ।
सर्वदुःखहरो देवस्तं ध्यायामि गजाननम् ॥ ५॥

अथ नामावलिः ।
ॐ गम् । पञ्चवक्राय नमः । दशभुजाय । ललाटेन्दवे । शशिप्रभाय । मुण्डमालाय । सर्पभूषाय । मुकुटाङ्गदभूषणाय । अग्न्यर्कशशिनो-भाभिस्तिरस्कुर्वते । दशायुधाय । धर्मप्रदाय । अर्थदाय । कामदात्रे । सौभाग्यवर्धनाय । विद्याप्रदाय । विभवदाय । भुक्तिमुक्ति-फलप्रदाय । आभिरूप्यकराय । वीरश्रीप्रदाय । विजयप्रदाय । सर्ववश्यकराय । गर्भदोषघ्ने । पुत्रपौत्रदाय । मेधादाय । कीर्तिदाय । शोकहारिणे । दौर्भाग्यनाशनाय । प्रतिवादिमुखस्तम्भाय । रुष्टचित्तप्रसादनाय । पराभिचार शमनाय । दुःखभञ्जनकारकाय । सर्वदुःखहराय । देवाय । गजाननाय नमः । (३३)

इति श्रीमहागणपतिनामस्तोत्रं नामावलिश्च ।

Proofread by Aruna Narayanan

*Shri Mahaganapatinama Stotram Namavali*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*